विः ।) विश्वासः । इति मेदिनी ॥ विशेषः । बाधकः । यथा,—
"क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशते" ।
इति कलापपरिशिष्टं ॥ रज्जुविवर्त्तस्य सर्पस्य रज्जुमात्रत्ववत् वस्तुविवर्त्तस्यावस्तुनोऽज्ञानादेः प्रपञ्चस्य वस्तुमात्रत्वं । तदुक्तं ।
"सतत्त्वतोऽन्यथा प्रथा विकार इत्युदीरितः ।
अतत्त्वतोऽन्यथा प्रथा विवर्त्त इत्युदाहृतः" ॥
अस्य फलं । आभ्यां अध्यारोपापवादाभ्यां तत्त्वम्पदार्थशोधनमपि सिद्धं भवति । इति वेदान्तसारः ॥

अपवारणं, क्ली, (अप + वृ + णिच् भावे ल्युट् ।) व्यवधानं । अन्तर्द्धानं । इत्यमरः ॥

अपवारितं, त्रि, (अप + वृ + णिच्, कर्म्मणि क्तः ।) अन्तर्हितं । इति हेमचन्द्रः ॥

अपवित्रं, त्रि, (पू + इत्रच्, ततो नञ्समासः ।) पवित्रतारहितं । अशुद्धं । यथा,—
"अपवित्रः पवित्रो वा सर्व्वावस्थां गतोऽपि वा ।
यः स्मरेत् पुण्डरीकाक्षं सवाह्याभ्यन्तरः शुचिः" ॥
इति स्मृतिः ॥ (अविशुद्धः । अनिर्म्मलः । दूषितः । मलिनः ।
"अपवित्रमिदं कर्म्म कृतं मोहान्धया तया" ।
इति रामायणे । "यदेष सारमेयोऽपवित्रः स्कन्धारूढो नीयते" । इति पञ्चतन्त्रे ।)

अपविद्धः, त्रि, (अप + व्यध् + क्तः ।) प्रत्याख्यातः । निराकृतः । इति हेमचन्द्रः ॥ (त्यक्तः । प्रतिक्षिप्तः ।
"कुवेरस्य मनःशल्यं शंसतीव पराभवं ।
अपविद्धगदो बाहुर्भग्नशाख इव द्रुमः" ॥
इति कुमारसम्भवे । चूर्णीकृतः । दलितः ।
"मृदिताश्चापविद्धाश्च दृश्यन्ते कमलस्रजः" ।
इति रामायणे ।)

अपविद्धपुत्रः, पुं, (अपविद्धः पुत्रः, कर्म्मधारयः,) द्वादशविधपुत्रमध्ये पुत्रविशेषः । स तु पोषणाद्यसमर्थमातापितृभ्यां त्यक्तः तयोरन्यतरमरणे अन्यतरेण वा त्यक्तः अनन्तरं अन्येन गृहीत्वा पुत्रत्वेन परिकल्पितः । यथा,—
"मातापितृभ्यामुत्सृष्टं तयोरन्यतरेण वा ।
यं पुत्रं परिगृह्णीयादपविद्धः स उच्यते" ॥
इति मनुः ॥

अपविषा, स्त्री, (अप अपगतं विषं यस्याः सा, स्त्रियां टाप् ।) निर्व्विषीतृणं । इति राजनिर्घण्टः ॥

अपशदः, पुं, (अप + शद् + कर्त्तरि अच् । अपसद इति पाठे अप + सद् + अच् ।) अपसदः । नीचः इत्यमरटीकायां भरतः ॥

अपशब्दः, पुं, (अप असंस्कृतः शब्दः, कर्म्मधारयः ।) असंस्कृतशब्दः । अशास्त्रीयशब्दः । लौकिकशब्दः । ग्राम्यभाषा । तत्पर्य्यायः । अपभ्रंशः २ । इत्यमरः ॥
("तएव शक्तिवैकल्यात् प्रमादालसतादिभिः ।
अन्यथोच्चारिताः शब्दा अपशब्दा इतीरिताः" ॥
इति हरिवंशे ।)
"आभीरादिगिरः काव्येष्वपभ्रंश इति स्मृतः ।
शास्त्रेषु संस्कृतादन्यदपभ्रंशतयोदितं" ॥
इति दण्डी ॥

अपशुक्[च्] पुं, (शुच् + भावे क्विप्, अपगता शुक् शोको यस्य सः ।) आत्मा । यथा । "क उत्तमश्लोकगुणानुवादात् पुमान् विरज्येत विनापशुग्घ्नात्" । इति श्रीभागवतं ॥

अपशोकः, पुं, (अपगतः शोको यस्मात् सः ।) अशोकवृक्षः । इति राजनिर्घण्टः ॥ ("शोकरहितः । दुःखहीनः ।
"हरप्रीतिकरो वृक्षो ह्यशोकः शोकनाशनः ।
दुर्गाप्रीतिकरोऽसि त्वं मामशोकं सदा कुरु" ॥
देवीपूजापद्धतिः ।)

अपष्ठं, क्ली, (अप + स्था + कः, अम्बाम्बागोसव्याप इत्यादिना षत्वं ।) अङ्कुशाग्रं । इति हेमचन्द्रः ॥

अपष्ठु, अ, (अप + स्था + "अपदुःसुभ्यः स्थः कुः, इति कु, सुषमादित्वात् षत्वम् ।) निरवद्यं । विपरीतं । शोभनं । इति शब्दमाला ॥

अपष्ठुः, पुं, (अप + स्था + कु, सुषमादित्वात् षत्वं ।) कालः । वामे त्रि । इति मेदिनी ॥ (समयः । असत्यः । विरुद्धार्थः । प्रतिकूलः । विपरीतः ।
"तव धर्म्मराज इति नाम कथमिदमपष्ठु पठ्यते । भौमदिनमभिदधत्यथवा भृशमप्रशस्तमपि मङ्गलं जनाः ।" इति माघः । वामः । दक्षिणेतरः ।)

अपष्ठुरं, त्रि, (अप + स्था + कुरच्, सुषमादित्वात् षत्वं ।) प्रतिकूलं । इति हेमचन्द्रः ॥

अपष्ठुलं, त्रि, (अप + स्था + कुरच्, रस्य लत्वं ।) प्रतिकूलं । विपरीतं । इति त्रिकाण्डशेषः ॥

अपसदः, पुं, (अपसीदति अपकृष्टत्वं प्राप्नोति, अप + सद् + पचाद्यच् ।) नीचः । इतरलोकः । इत्यमरः ॥
("विप्रस्य त्रिषु वर्णेषु नृपतेर्वर्णयोर्द्वयोः ।
वैश्यस्य वर्णे चैकस्मिन् षड़ेतेऽपसदाः स्मृताः" ॥
इति मनूक्ते अनुलोमवर्णस्त्रीजाते वर्णसङ्करभेदे मूर्द्धावसिक्तादौ पुं स्त्री ।)

अपसरः, पुं, (अप + सृ + भावे अप् ।) अपसरणं । स्थानात् स्थानान्तरगमनं । अपोपसर्गात् गत्यर्थसृधातोर्भावे अप्प्रत्ययः ॥
("निरन्वयोऽनपसरः प्राप्तः स्याच्चौरकिल्बिषं" ।
इति मनुः ।)

अपसर्ज्जनं, क्ली (अप + सृज + भावे ल्युट् ।) मोक्षः । परित्यागः । दानं । इति भूरिप्रयोगः ॥ (वधः । हत्या । परिवर्जनं ।)

अपसर्पः, त्रि, (अपसर्पति, अप + सृप् + कर्त्तरि अच् ।) चरः । हरकरा इति प्रसिद्धः । इत्यमरः ॥ (गूढ़चरः । स्पशः ।
"यथार्हवर्णः प्रणिधिरपसर्पश्चरः स्पशः ।
चारश्च गूढ़पुरुषश्चाप्तः प्रत्ययितस्त्रिषु" ॥
इत्यमरः ।
"सर्पाधिराजोरुभुजोऽपसर्पं
पप्रच्छ भद्रं विजितारिभद्रः" ।
इति रघुवंशे ।)

अपसव्यि, अ, (अप + सव् + बाहुल्यात् अवि ।) प्रदेशिन्यङ्गुष्ठयोरन्तरा । पितृतीर्थं । यथा ।
"प्रदेशिन्यङ्गुष्ठयोरन्तरा अपसव्यि अपसव्यं वा तेन पितृभ्यो निदधाति" । इति श्राद्धतत्त्वे भट्टभाष्यधृतगृह्यं ॥

अपसव्यं, क्ली, (सव्यादपक्रान्तं, "निरादयो गताद्यर्थे पञ्चम्या" इति समासः ।) अपसव्यि । पितृतीर्थं । इति श्राद्धतत्त्वे भट्टभाष्यधृतगृह्यं ॥

अपसव्यः, त्रि, (सव्यादपक्रान्तः, "निरादयो गताद्यर्थे पञ्चम्या" इति समासः ।) शरीरदक्षिणभागः । प्रतिकूलः । इति मेदिनी ॥ (विपरीतः ।
"वाता मण्डलिनस्तीव्रमपसव्यं प्रचक्रमुः" ।
इति रामायणे ।)

अपस्करः, पुं, (अपकीर्य्यते, अप + कॄ + अप्, "अपस्करो रथाङ्गमिति" पाणिनिसूत्रेण सुड़ागमः ।) रथाङ्गं । तच्च चक्रयुगचक्रादि । इत्यमरः ॥ गुह्यद्वारं । विष्ठा । इति धरणी ॥

अपस्नातः, त्रि, (अपकृष्टत्वेन स्नातः अमङ्गलार्थत्वात्, अप + स्ना + कर्त्तरि क्तः ।) मृतमुद्दिश्यकृतस्नानो जनः । इत्यमरः ॥ ("अपस्नातस्नानिष्पीड़ितमौलिरेव भवनमाजगाम" इति हर्षचरिते ।) संस्कारार्थं स्नापितो मृतः । इति स्वामी ॥

अपस्नानं, क्ली, (अप + स्ना + भावे ल्युट् ।) मृतस्नानं । मृतोद्देशकस्नानं । इति हेमचन्द्रः ॥ (अपविस्नानं । स्नानावशिष्टजलेन स्नानं । स्नानोदकं । स्नानावशिष्टं जलं ।
"उद्वर्त्तनमपस्नानं विण्मूत्रे रक्तमेव च ।
श्लेष्मनिष्ठ्यूतवान्तानि नाधितिष्ठेत्तु कामतः" ।
इति मनुः ।)

अपस्मारः, पुं, (अपस्मर्य्यते पूर्व्ववृत्तं विस्मर्य्यतेऽनेन, अप + स्मृ + करणे घञ् ।) रोगविशेषः । मृगी इति भाषा । तत्पर्य्यायः । अङ्गविकृतिः २ लालाधः ३ भूतविक्रिया ४ । इति राजनिर्घण्टः ॥*॥
तस्य सामान्यरूपं ।
"तमःप्रवेशः संरम्भो दोषोद्रेकहतस्मृतेः ।
अपस्मार इति ज्ञेयो गदो घोरश्चतुर्व्विधः" ॥*॥
तस्य निदानपूर्व्विका सम्प्राप्तिः ।
"चिन्ताशोकादिभिः क्रुद्धा दोषा हृत्स्रोतसि स्थिताः ।
कृत्वा स्मृतेरपध्वंसमपस्मारं प्रकुर्व्वते" ॥ * ॥
तस्य पूर्व्वरूपं । यथा,—
"हृत्कम्पः शून्यता स्वेदो ध्यानं मूर्च्छा प्रमूढ़ता ।
निद्रानाशश्च तस्मिंश्च भविष्यति भवत्यथ" ॥ * ॥
वातिकस्य रूपं ।
"कम्पते प्रदशेत् दन्तान् फेनोद्वामी श्वसित्यपि ।
परुषारुणकृष्णानि पश्येद्रूपाणि चानिलात्" ॥ * ॥
पैत्तिकस्य रूपं ।
"पीतफेनाङ्गवक्त्राक्षः पीतासृग्रूपदर्शनः ॥
सतृष्णोष्णानलव्याप्तलोकदर्शी च पैत्तिकः" ॥ * ॥
श्लैष्मिकरूपं ।
"शुक्लफेनाङ्गवक्त्राक्षः शीतहृष्टाङ्गजो गुरुः ।
पश्यन् शुक्लानि रूपाणि श्लैष्मिको मुच्यते चिरात्" ॥*
त्रिदोषजरूपं ।